19786

सुश्रुतसंहिता

स्प २

नदी

स्यामः॥३॥गर्भेकेशश्मश्रुलोमनखदंतास्थिसिरास्नायुधमनीरेतःप्रभृ
तीनिस्थिराणिपितृजानि।मांसशोणितमेदोमज्जहृन्नाभियकृत्प्लीहांत्रगु ३२
दप्रभृतीनिमृदूनिमातृजानि।शरीरोपचयवर्णबलवर्णहानिवृद्धिःस्थिति
स्थैरसजानि।इंद्रियाणिज्ञानंविज्ञानमायुःसुखदुःखादिकंचात्मजानि।
सत्वजानुत्तरत्रवक्ष्यामः।वीर्यमारोग्यंबलवर्णौमेधांचसात्म्यजानि।तत्र
यस्याहव्होास्तनप्राकाययोरदर्शनंभवतिहरिणा।होमहत्वंचदर्वैदद्धि

णेस्वकिंचित्कर्षयतिवाकुर्यात्तत्पुन्नामधेयेषुदोहदमभिध्यायतिस्वप्ने
षुचोपलभतेपद्मोत्पलकुमुदाम्रातकादीनिपुन्नामान्येववाप्रसन्नवर्णा
चभवतितांब्रूयात्पुत्रमियंजनयिष्यतीति।तद्विपर्ययेकन्यासुभयलिंग
दर्शनेनपुंसकं।यस्याःपार्श्वद्वयमुन्नतेपुरस्तान्निर्गतमुदरंस्यागमिहि
तेलक्षणंचतत्स्यान्नपुंसकमितिविंद्यात्।यस्यामध्येरामराजीनिम्ना
द्रोणीभूतमुदरंसाद्युगंप्रसूतेइति।भवंतिचात्रदेवताब्राह्मणपराः

शौचाचाररहितैर्वैताः॥ महागुणान्प्रसूयंते विपरीतास्तु निर्गुणान्॥ अंगप्रत्यं
गनिर्वृत्तिःस्वभावादेवजायते॥ अंगप्रत्यंगनिर्वृत्तौयेभवंतीगुणागुणाः॥ तेते
गर्भस्यविज्ञेयाधर्माधर्मनिमित्तजाः॥ इतिसौश्रुतेऽपायुर्वेदशास्त्रेगर्भावक्रां
तिशारीरंनामतृतीयोऽध्यायः॥३॥ अथातोगर्भव्याकरणंशारीरंव्याख्यास्यामः॥
अग्निःसोमोवायुःसत्त्वंरजस्तमः॥ पंचेंद्रियाणिभूतात्मेतिमनःप्राणास्तत्र
तस्यखल्वेवंप्रवृत्तस्यशुक्रशोणितस्याभिपच्यमानस्यक्षीरस्येवसंतानि

१९

निकाः सत्वैस्त्वचोमवेति। तासांप्रथमा चंद्रमासिनीनामयासर्वेवर्णानंच
भासयति पंचविधांयैछायांप्रकाशयति सांप्रीहे रुष्टादशभागप्रमाणामि
धीपद्मकेटकाधिष्टानी। द्वितीयासोहिता नामषोडशभागप्रमाणाति
लकालकन्यछवंगाधिष्टानी। तृतीयश्विता नामद्वादशभागप्रमाणाच
र्मदृष्टांजगेद्दीमशाकाधिष्टानी। चतुर्थीताम्रानामाष्टभागप्रमाणाविद्वि
धकिलासधिष्टानी। पंचमीवेहिनीनामपंचमभागप्रमाणाकुष्टविसर्पा

यदेतत्प्रमाणं निर्दि
ष्टं तन्मांसलेषु व
काशेषु न ललाटप्र
सृतांगुल्यादिषु २

धिष्ठानौ। षष्ठीसोहित्तिकानामत्तीहिप्रमाणंग्रंथ्यपंच्यावुंहस्तीपद्गुगजगेहाधि वङ्केशीर

ष्ठानाःसप्तमीमांसधरात्तीहिद्वयप्रमाणामगेंद्रविड्ध्येत्रोंधिष्ठानौयतोवद्ग

उदरेषु ३ तीत्राहिमुखेनांगुष्ठोद्द्रप्रमाणामवगाढं विध्येद्दितिकलाःखल्वपिसं(मज्जति)बंधी

त्वाशयांतरमर्यादाःभवंतिचात्र।यथाहिसारःकाष्ठेषुछिद्यमानेषुदृश्यते

तथाधातुर्हिमांसेषुछिद्यमानेषुदृश्यते।स्नायुभिश्चप्रतिच्छन्नान्संततांश्चज

राणा।श्लेष्मणावेष्टितांश्चापिकलाभागांस्तुतान्विदुः।तासांप्रथमामां

युर धात्वाशयांतरेक्लेदोयःकेदस्त्वधितिष्ठति।देहो(नाडी)ष्मणाविपक्वस्तुकलेत्यभिधीयते।

सधरायस्यांमांसशिरास्नायुधमिनीश्रोतसांप्रतानाभवंति।भवतिचात्रय
थाविसमृणालानिविवर्द्धंतेसमंततः।भूमौपंकोदकस्थानेतथामांसेशि
राहयः।द्वितीयारक्तधरामांसस्याभ्यंतरतस्तस्यांशोणितंविशेषतश्चशि
रासुयकृत्प्लीह्नोश्चभवति।भवतिचात्र।वृक्षाद्यथाभिप्रहिताक्षीरिणःक्षीर
मावहेत्।मांसादेवंक्षताक्षिप्रंशोणितंसंप्रसिच्यते।तृतीयामेदोधरामे
दोहिसर्वभूतानामुदरस्थमणुस्थिषुच।महत्सुचमज्जाभवति।भवति

२०

चात्र। स्थूलास्थिषु विशेषेण। मज्जा त्वभ्यंतरे स्थितः। अथेतरेषु सर्वेषु स-
रक्तं मेद उच्यते॥ शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता। पच्यमानस्य वा स्नेहो
मेदसः सा वसा मता। चतुर्थी श्लेष्मधरा सर्वसंधिषु प्राणभृतां भवति। भवति चा-
त्र। स्नेहाभ्यक्ते यथा ह्यक्षे चक्रं साधु प्रवर्त्तते। संधयः साधु वर्त्तंते संश्लिष्टाः श्लेष्म-
णा तथा। पंचमी पुरीषधरा नाम [illegible] यांतःकोष्ठे मलमभिविभज-
ति पक्वाशयस्था। भवति चात्र। षष्ठी पित्तधरा या चतुर्विधमन्नपानमुपप्लुतं
य कृत्समंतात्कोष्ठे च तथांत्राणि समाश्रिता। उ[illegible]दकस्थं विभजते मलं मलधरा क[illegible]ला॥

मामाशयात्प्रचुतंपक्वाशयोपस्थितंधास्यति।भवतिचात्र।अशितंखादि
तंपीतंलीढंचेतिचतुर्विधं।तज्जीर्यतियथाकालंशोषितंपित्ततेजसास
प्तमीशुक्रधरा नामयासर्वेप्राणभृतांसर्वशरीरव्यापिनी।भवतिचात्र।
यथापयसिसर्पिस्तुगूढश्चेक्षौरसोयथा।शरीरेषुतथाशुक्रंनृणांविद्याद्
भिषग्वरः।द्व्यंगुलेदक्षिणेपार्श्वेवस्तिद्वारस्यचाप्यधः।मूत्रस्रोतःयथाशु
क्रंपुरुषस्यप्रवर्त्तते।कृत्स्नदेहस्थितंशुक्रंप्रसन्नमनसस्तथा।स्त्रीषुव्याय

छतस्यापिहृदयाश्रितंप्रवर्त्ततेगृहीतगर्भाणामार्त्तववहानांस्रोतसांवर्त्मा
न्यवरुध्यंतेगर्भेण।तस्माद्गृहीतगर्भाणामार्त्तवंनदृश्यते।ततस्तदधःप्रति
हतमूर्द्ध्वमागतमपरंचोपचीयमानम परेत्यभिधीयते।शेषंचोर्द्ध्वतरमाग
तंपयोधरावभिप्रतिपद्यते।तस्माद्गर्भिण्यःपीनोन्नतपयोधराभवंति।गर्भ
स्ययकृत्प्लीहानौशोणितजौ।शोणितफेनप्रभवःफुप्फुसः।शोणितकिट्टप्रभव
उंडुकः भवतिवान्त्रअस्रजःश्लेष्मणश्चापियःप्रसादःपरोमतः।तंपच्यमानं

उदरेवध्मायमानानामाध्मानाद्रुक्मसारवत् १ यथार्थमूष्मणायुक्तोवायुःस्रोतांसिदारयेत् । अनुप्रविश्यपिशितंपेशीर्विभजतेतथा । मेदसःस्नेहमादायसिरास्नायुत्वमाप्नुयात् ३ ॥

पित्तेनवातस्याप्यनुधावतिततोस्यांत्राणिजायंतेगुदंवस्तिश्चदेहिनः । तंत्रा
स्यऽमथ्यमानस्यध्मायमानस्यरुक्मवत् । कफशोणितमांसानांसारोजिह्वाप्र
जायते । शिराणांतुमृदुःपाकःस्नायूनांतुततःखरः । आशयाभ्यासयोगेनक
रोत्याशयसंभवं ॥ रक्तमेदःप्रसाद्(वा)वृक्कौ । मांसासृक्कफमेदःप्रसादाद्वृषणौ
शोणितकफप्रसादजंहृदयं । यदाश्रयाहिधमन्यःप्राणवहाःतस्याधोवामतः
प्लीहाफुप्फुसश्चदक्षिणतोयकृत्क्लोमच । यथार्थमूष्मणायुक्तोवायुःस्रोतां

सिहारयेत्तु। अन्नुअविक्षपपिशितोपेशीर्विभजतेतथा। मेदस्सः स्नेहमाहाय
शिरास्नायुत्वमाप्नुयात्॥ तद्धृदयेविशेषेणचेतनास्थानमत स्तस्मिंस्तमसाहृ
तेसर्वप्राणिनःस्वपंति। भवंतिचात्र। पुंडरीकेनसदृशंहृदयंस्यादधोमुखं
जाग्रतस्तद्विकसतिस्वपतश्चनिमीलति। निद्रांतुवैष्णवींपाप्मानमुप
दिशंतिसास्वभावतएवसर्वप्राणिनोभिस्पृशति। तत्रयदासंज्ञावहानिस्रो सातामसीश्लाघ्या
तांसितमोभूयिष्ठःश्लेष्माप्रतिपद्यतेत दातामसीनामनिद्राभवत्यनव विकीवैकारिकी
वाम २

२३

वोधिनी।साप्रलयकाले।तमोधिष्ठानामहस्सुचनिशासुचभवति।रजो
धिष्ठानामनिमित्तंसत्वाधिष्ठानामर्द्धरात्रे क्षीणश्लेष्मभूनामनि
लबहुलानांमनःशारीराभितापवतांचनैवास्यावैकारकीभवति।भवति
चात्र।हृदयंचेतनास्थानमुक्तं।सुश्रुतदेहिनां।तमोभिभूतेतस्मिंस्तुनि
द्राविशतिदेहिनं।निद्राहेतुस्तमःसत्वंवोधनेहेतुरुच्यते।स्वभावएववाहे
तुर्गरीयान्परिकीर्त्तितः।पूर्वदेहानुभूतांस्तुभूतात्मास्वपतःप्रभुः।रजो

२३

युक्तेनमनसागृह्णात्यर्थान्सुभासुभान्।करणानांतुवैगुण्येतमसाभिप्रवर्द्धि
ते।अस्वपन्नपिभूतात्माप्रसुप्तइवचोच्यते।सर्वर्त्तुषुदिवास्वप्नःप्रतिषिद्धोन्यत्र
ग्रीष्मात्।प्रतिषिद्धेष्वपितुबालवृद्धक्षतक्षीणास्त्रीकर्शितमद्यनित्ययानवाहन
कर्म्मपरिश्रांतानामभुक्तवतांमेदःस्वेदकफरसक्तक्षीणानांचमुहूर्त्तंस्वप्नमप्र
तिषिद्धं।रात्रावपिजागरितानां।जागरितकालादर्द्धमिष्यतेदिवास्वप्नः।वि
कृतिर्हिदिवास्वापोनाम।तत्रस्वपतामधर्म्मःसर्वदोषप्रकोपश्च।तत्प्रको

क्षुश्वासकासप्रतिश्यायशिरोरोगौरवारोचकज्वराग्निदौर्बल्यानि भवंति ।रात्रौच
प्रजागरितावतां वातपित्तनिमित्तास्त एवोपद्रवा भवंति। भवंति चात्र। त
स्मान्नजागृयाद्रात्रौ दिवास्वप्नंवे वर्ज्जयेत्। ज्ञात्वा दोषकरावेतौ बुधः स्वप्नं
मितं चरेत्। अरोगः सुमना ह्येवं बलवर्णान्वितो वृषः।। नातिस्थूलकृशः श्रीमा
न्नरो जीवेत्समाः शतं। दिवारात्रौ च ये नित्यं स्वप्नजागरणोचिताः। न तेषां स्वप
तां दोषो जाग्रतां वा प्रजायते। निद्रानाशे निलात्पित्तान्मनस्तापात्क्षयादपि। संभव

२४

स्यन्निद्रानाशस्त्वप्रत्यनीकैः प्रशाम्यति। निद्रानाशेभ्यंगयोगो मूर्द्धिं तैलनिषेव
णं। गात्रस्योद्वर्त्तनं चैव तथा संवाहनानि च। शालिगोधूमपिष्टान्नभक्षैरैक्षव
संस्कृतैः। भोजनं मधुरं स्निग्धं क्षीरमांसरसादिभिः॥ रसैर्बिलेशयानां च विष्किरा
णां तथैव च। द्राक्षासितेक्षुद्रव्याणामुपयोगो भवेन्निशि। शयनासनयाना
नि मनोज्ञानि मृदूनि च। निद्रानाशे तु कुर्वीत तथान्यान्यपि बुद्धिमान्॥ वमेन्नि
द्राभियोगे तु कुर्यात्संशोधनानि च। कफमेदोविषार्त्तानां रात्रौ जागरणं हितं॥

हिवास्वप्रस्थ तद्दस्मल हिका। जीर्णाति सारिणां। ड्रांड्वं यार्थेष्वसंवित्तिगौ शिवंजं
भणांक्रमः। निद्रार्त्तस्यैवयस्यैतेतस्यतंत्रां विनिर्हि द्वेतर। पीत्वैकमनिलो च्छास
मुद्देष्पन्न विवृताननः नमुंचतिसनेत्राम्भंसजृंभइतिसंज्ञितः प्राणो पानौ समौ।
स्यातां। म्नः द्वि श्रोतः यथास्थितौ। नस्तः प्रवर्त्तते ग्राह्यः क्षुवथुं तं विनिर्हि द्वो तर
योनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः क्लमः स इति विज्ञेय इंद्रियार्थप्र
बाधकः। सुखस्पर्शोप्रसंगित्वं दुःखद्वेषणो लसता। शक्तस्यचाप्यनुत्साहः क

२५

र्मस्वास्थ्यमुच्यते।उक्तंचपातञ्जलेननिर्मद्धित्वोद्भवात्स्वाराणांनिसेवितंहृद
यंपीड्यतेचास्यतमुक्तेत्रांविनिर्दिशेत्।उपाईचमर्मोवनद्वंचयोगात्रंमन्य
तेनरः।तथागुरुशिरोत्पथ्यंगोस्वंतद्धिनिर्दिशेत्।वाताद्यैःकारणैर्वा
युर्हृद्वारेव्याप्यतिष्ठति।सरुद्धोश्वमस्यास्यहृदेष्टंतंप्रचक्षते।मूर्छा
पित्ततमःप्रायारजःपित्तानिलात्भ्रमः।तमोवातकफात्तंद्रानिद्राश्लेष्मात
मोन्नवा।गर्भस्यरवतुरसनिमित्तावातात्मानंनिमित्ताच्चहृद्धिर्भवति

नवंतिघ्राघ्रातस्यांतरेणनाभेस्तुज्योतिःस्थानंध्रुवंस्मृतं।तदाधमति
वातस्तुदेहस्तेनास्यवर्द्धते॥ऊष्मणासहितस्यांतरेणनाभेःश्चापिदा
रयत्यस्यमारुतः।ऊर्ध्वंतिर्यगधस्ताच्चस्रोतांस्यपियथातथा।दृष्टिश्चरो
मकूपाश्चनवर्द्धंतेकदाचन।ध्रुवाण्येतानिमर्त्यानामितिधन्वंतरेर्म
तं।शरीरेक्षीयमाणेपिवर्द्धतेद्वाविमोसदा।स्वभावंप्रकृतिंकृत्वानख
केशाविितिस्थितिः।सप्तप्रकृतयोभवंतिदोषैःपृथक्द्विशःसमस्तै

स्य।।भवतिचात्र।।शुक्रशोणितसंयोगेयोभवेद्दोषउत्कटः।प्रकृतिर्जायतेतनस्या
मेलक्षणं।।शृणु।।तत्रः।प्रजागरूकः।शीतद्वेषीदुर्भगःस्तेनोमत्सर्यनार्योगांधर्वचि
त्तःस्फुटितकरचरणोल्परूक्षश्मश्रुनखकेशःक्रोधीदंतनखादीचभवति
ऽधृतिरदृढसौहृदःकृतघ्नःकृशपरुषोधमनीततःप्रलापिद्रुतगतिरटनो
नवस्थितात्माविषयतिचगच्छतिसंभ्रमेणसुप्तः।अव्यवस्थितमतिश्चलदृष्टि
र्मंदरत्नधनसंचयमित्रः।किंचिद्देवविलयत्यनिबद्धंमारुतप्रकृतिरेषम

ऊष्णः। स्वेदनो दुर्गंधः पीतः शिथिलांगस्ताम्रनखनयनतालुजिह्वोष्ठपाणि
पादतलो दुर्भगो वलिपलितखालित्ययुक्तो बहुभुक् महाद्वेषी क्षिप्रकोपप्रसादो
मध्यबलो मध्यायुश्च भवति। मेधावी निपुणमतिर्विगृह्य वक्ता तेजस्वी समितिषु
दुर्निवारश्चार्यः। स्नुसः सतु कनकपलाशकर्णिकारानुलेपनेष्वपि बहुतास
विद्युदुल्कानलभयात्प्राणमेहनतेष्वमृदुः प्रणतेष्वपि सान्त्वं न हानरुचिः भवति
हसहाव्यथितास्यगतिः समवेहि हरक्षितसत्तप्रकृतिः। इंदीवरनिस्त्रशा

द्रीघ्घ्राणःकांडाननःमन्यातमवशः:सुभगः प्रियदर्शनोमधुराप्रियःकृतज्ञो
धृतिमान्सहिष्णुरलोलुपोवलवांस्थिरग्राहीदृढवैरश्चभवति॥शुकाद्वाः
स्थिरकुटिलालिनीलकेशोजस्रीवाब्दजलदमृदंगसिंहघोषः सुसःसन्नस
कमलहेमसदृक्षवाकान्तसंयत्रपेहपिच्वेजलाङ्ग्यान्मनोज्ञान्तरक्तांतनेत्रः
सुविभक्तगात्रः स्निग्धछविः सत्वगुणोपपन्नः क्लेशाक्षमोमानपिगुरूणा
ज्ञेयोवलासप्रकृतिर्मनुष्यः श्लेष्यकः दृढशास्त्रमतिःस्थिरमित्रधनः

स

पशिशुणापचिरात्प्रहरति वङ्ग।परिशिष्टतवाक्यपटुःसततंतुरुगानकरस्य
मवेद्यमहा।द्वयोर्वातिसृणांवापिप्रकृतीनांतुलक्षणैः।ज्ञात्वासंसर्गजावेद्याःप्रकृ
तीरभिनिर्दिशेत्॥प्रकोपोवान्यभावोवाक्षयोवानोपजायते।प्रकृतीनांस्वभावेनजा
यतेतुगतायुषः॥विषजातोयथाकीटोनविषेणविपद्यते।तद्वत्प्रकृतयोमर्त्यंश
क्नुवंतिनवाधितुं।प्रकृतिमिहनराणांभौतिकींकेचिदाहुःपवनदहनतोयैःकी
र्तितास्तास्तुतिस्रः।स्थिरविपुलशरीरःपार्थिवश्चक्षमावान्।शुचिरथचिरजी

वीनामसः श्वैर्म्महद्भिः ॥ शौचमास्तिक्यमभ्यासो वेदषु गुरुपूजनं प्रियातिथित्वमिज्या

च ब्रह्मकायस्य लक्षणं ॥ माहात्म्यं शौर्यमाज्ञा च सततं शास्त्रबुद्धिता ॥ भृत्यानां भरणं चापि

माहेंद्रं कायलक्षणं ॥ शीतातयासहिस्नुत्वं पैंगल्यं हरिकेशतः ॥ प्रियवादित्वमत्येतद्वा

रुणं ॥ द्मां प्रिमां कायलक्षणं ॥ मध्यस्थत्वं सहिस्नुत्वमर्थस्यागमसंचयो महाप्रसवशक्ति

श्च कौबेरं कायलक्षणं ॥ गंधप्रियत्वं च नृत्यवादित्रकामिता ॥ विहारशीलता चैव गां

धर्वं कायलक्षणं ॥ प्राप्तकारी दृढोत्थानो निर्भयः स्मृतिवान् शुचिः रागमोहमदद्वे

षीवीर्डिंतोयमस्त्ववान्। इज्यव्रतब्रह्मचर्यहोमाध्ययनसेवितं। ज्ञानविज्ञानसंपन्ना
मृषिसत्वंविदुर्नरं॥ मृषिसत्वंविदुर्नरं। सप्तैतेसात्विकाःकायाराजसास्तुनिबोध
मे। ऐश्वर्यवंतंरौद्रंचशूरंचंडमसूयकं। एकाशिनंचौषधिकमासुरंसत्वमीदृशं
तीक्ष्णोमायाविनंभीरुंचंडंमायान्वितंतथा॥ विहाराहारचपलंसर्पसत्वंविदुर्नरं
प्रवृद्धकामंसेवीवाय्याजस्राहारएवच। अमर्षणोनवस्थायी। शाकुनंकायमुद्ध
तं॥ एकांतग्राहितारौद्रमसूयाधर्मबाह्यता। भृशमात्वेतमश्चापिराक्षसंका

यल्लक्षणं॥उच्छिष्टाहाररतातैक्ष्ण्यंसाहसप्रियता तथा॥स्त्रीलोलुपत्वंनैर्लज्ज्यंपैशा
चंकायलक्षणं॥अप्संविभागमालस्यंदुःखशीलमसूयकं।लोलुपंचाप्यदा
तारंप्रेतंसत्वंविदुर्नरेश॥षडेतेराजसाःकायास्तामसांस्तुनिबोधमे॥दुर्मेधस्त्वं
मंदत्वंस्वप्नेमैथुननित्यता॥निराकरिष्णुताचैवविज्ञेयाःपाशवागुणाः॥अनवस्थि
तताभीरुत्वंनारुत्वंसलिलार्थिता॥परस्पराभिमर्दश्चमत्स्यसत्वस्यलक्षणं॥एक
स्थानरतिर्नित्यमाहारेकेवलेरतः॥वानस्पत्योनरःसत्वधर्मकामार्थवर्जितः॥इत्ये

तेत्रिविधाःकायाःप्रोक्तावेतामस्मास्तथा।कायानांप्रकृतिंज्ञात्वात्वनुरूपांक्रियां
चरेत्।महाप्रकृतयस्त्वेतारजःसत्वतमःकृताः।प्रोक्तास्तज्ज्ञानतःसम्यक्भि
षक्तांश्चविभावयेत्॥इतिगर्भव्याकरणेशारीरंचतुर्थंसमाप्तं॥ ॥अथातः
शारीरसंख्याव्याकरणंशारीरंव्याख्यास्यामः॥शुक्रशोणितंगर्भाशयस्थमात्म
प्रकृतिविकारसंमूर्छितंगर्भइत्युच्यते।तंचचेतनावस्थितंवायुर्विभजते।ते
जएनंपचति।आपःक्लेदयंति।पृथिवीसंहिंति।आकाशोविवर्धयति॥एवंविव

३०

ष्ठितः॥स्यद्वाहृस्तपादजिह्वाघ्राणोकर्षानि तैर्वाद्दिभिरंगैरूपेतस्तद्वाशरीरमिति
संज्ञांसमेते॥तत्रषडंगं॥शाखाश्चतस्रोमध्यंचमूर्धाषष्ठंशिरइति॥अतःपरंप्रत्यं
गानिवक्ष्यंते॥मस्तकोदरपृष्ठनाभिललाटनासाचिबुकबस्तिग्रीवाइत्येताएके
काः॥कर्णनेत्रभ्रूशंखांसगंडकक्षास्तनवृषणपार्श्वस्फिक्जानुबाहूरुप्रभृतयोद्वे
द्वेविंशतिरंगुल्यः स्रोतांसिवक्ष्यमाणानि॥एषप्रत्यंगविभागस्तु॥तस्यपुनःस्वरूपंव्या
नं॥त्वचःकलाधातवोमलादोषायकृत्प्लीहानौफुप्फुसउंडुकोहृदयआमाशयआं

३१

त्राणि हृक्कौ श्रोतांसि कंडराजालानि कूर्च्चरज्जवः सेवन्यः संघाताः सीमंतान्यस्थी

नि संधयः स्नायवः पेश्यो मर्म्माणि शिराधमन्यो योगवहानि श्रोतांसि च। त्वचः स

प्त कलाः सप्ताशयाः सप्त धातवः सप्त॥ सप्त शिराशतानि पंच पेशीशतानि नव स्नायुश

तानि त्रीण्यस्थिशतानि द्वे दशोत्तरे संधिशते सप्तोत्तरं मर्म्मशतं। चतुर्विंशति

र्धमन्यस्त्रयो दोषास्त्रयो मलानव श्रोतांसीति समासः। विस्तरोतऊर्द्ध्वं। त्वचोभि

हिताः॥ कलाधातवो मलादोषा यकृत्प्लीहानौ फुप्फुस उंडुको हृदयं हृक्कौ च आ

३१

शयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्रा
शयः स्त्रीणां गर्भाशयोऽष्टम इति सार्द्धं त्रिव्यामान्यंत्राणि पुंसां स्त्रीणामर्द्धव्यामहीना
नि श्रवणनयनवदनघ्राणगुदमेढ्राणि नव स्रोतांसि नराणां बहिर्मुखानि । एता
न्येव स्त्रीणामपराणि च त्रीणि द्वे स्तनयोरधस्ताद्रक्तवहं च । षोडश कंडरास्तासां
चतस्रः पादयोस्तावत्यो हस्तयोर्ग्रीवाहृदयेषु तत्र हस्तपादगतानां कंडराणाम
ग्रं च नखाग्रप्ररोहाः । ग्रीवाहृदयनिबंधिनीनामधोभागगतानां मेढ्रं श्रो

णीश्लेष्मनिबंधिनीनांमध्येमार्गतानोनितेवः महांत्स्ट द्वे ह्रेउग्रपिंडादीनांच।मांस
सिरास्नाय्वस्थिजालानिप्रत्येकंचत्वारि॥ तानिम(णि)बंधगुल्फसंश्रितानि
परस्परनिबद्धानि।परस्परसंश्लिष्टानिपरस्परगवाक्षितानिचेति।येर्गवाक्षित
मिदंशरीरं।षट्कूर्चास्तेहस्तयाःग्रीवामेढ्रेषु।महत्योमांसरज्जवश्चतस्रःपृष्ठ
वंशमुभयतःपेशीनिबंधनार्थंद्वि बाह्ये द्वेआभ्यंतरेचद्वेसप्तसेवन्यःशिरसिवि
भक्ताःपंच।जिह्वासेफसोरेकैकास्ताःपरिहर्तव्याःशस्त्रेण।चतुर्दशास्थ्नां

संघातास्तेषां त्रयो जानुगुल्फवंक्षणेषु। एतेनेतरस्य सक्थि वाहू व्याख्यातौ त्रिकशि
रसोरेकैकस्य चतुर्दश सीमंताः युक्ताः संघातास्ते खल्वष्टादश एकेषां त्रीणि सष
ष्टान्यस्थिशतानि वेदवादिनो भाषंते। शल्यतंत्रे त्रीण्येव शतानि। तेषां विंशमस्थि
शतं शाखासु सप्तदशोत्तरं श्रोणिपार्श्वपृष्ठोदरोरस्सु। ग्रीवां प्रत्यूर्द्ध्वं त्रिषष्टिः
एकैकस्यां तु पादांगुल्यां त्रीणि तानि पंचदश। तलकूर्चगुल्फसंश्रितानि दश। पा
र्ष्णामेकं जंघायां द्वे। जानुन्येकमेकमूराविति त्रिंशदेवमेकस्मिन्सक्थिनि भवं

त्ति।एतेनेतरस्मिन्नपिव्याख्यातो।अथोल्पं पंच।तेषांनगणुहनितं वेष्टुचत्वा
रिंत्रिकसंश्रितमेकं।पार्श्वे षट्।त्रिंश देवमेकस्मिन्नद्वितीयेप्येवं।१२ त्रिंश
द्दष्टानुरस्मिद्देवःपद्मकेसंजेश्राव्याग्रांनवकेटनाड्यांचत्वारि।हेहन्चोः"द्दंताद्दा
त्रिंशति।नाम्यांत्रीणि।एकंतालुनि।गंडकर्णशंखेषुचैकैकं।पञ्चिरसीत्येतान्य
स्थीनियेचविधानिमर्वसिनियथाक्रपालरुचकतरुणवालयनलकंसंज्ञानि
तेषांजानुनितंबांसगंडतालुशंखशिरस्सुकपालानि।दशनास्तुरुचकाः

ष्ठाणां कल्प्यो वा ह्निकोभ्यंतरगतैः सारैर्यथा तिष्ठंति भूरुहाः। अस्थिसारैस्तथा
देहा ध्रियंते देहिनां ध्रुवं। तस्माच्चिरविनष्टेषु त्वङ्मांसेषु शरीरिणां। अस्थीनि न वि
नश्यंति साराण्येतानि देहिनां। मांसान्यत्र निबद्धानि शिराभिः स्नायुभिस्तथा। अ
स्थीन्यालंबनं कृत्वा न शीर्यंते पतंति वा। संधयस्तु द्विविधाः। चेष्टावंतः स्थिरश्च। शा
खासु हन्वोः कट्यां च चेष्टावंतस्तु संधयः। शेषास्तु संधयः सर्वे विज्ञेयास्तु स्थिरा
बुधैः। संख्यातस्तु दशोत्तरे द्वे शते। तेषां शाखास्वष्टषष्टिरेकोनषष्टिः कोष्ठे। ग्री

वांश्रत्सर्वैर्द्व्यशीतिः एकैकस्यां तु पादांगुल्यां त्रयस्त्रयो द्वावंगुष्ठे ते चतुर्दश जानु
गुल्फवंक्षणोरेकैकः। एवं सप्तदशैकस्मिन्सक्थ्नि भवन्ति एतेनेतरसक्थि बा
हू व्याख्यातौ। त्रयः कटीकपालेषु हृदयत्क्रोम निवद्धास्त्वष्टादश। दशनपरिमा
णा हंतमूलेषु। एकः काकलके। नासायां च। द्वौ द्वौ वर्त्ममंडलजौ नेत्राश्रयगंडक
र्णशंखेष्वेकैकः द्वौ हनुसंधी द्वावुपरिष्टाद्भ्रुवोः शंखयोश्च। पंच शिरःकपालेषु

एको मूर्ध्नि इत्येते संधयोऽष्टविधाः। तद्यथा। कोरोडूखलसामुद्गप्रतरतुन्नसेव

नीवायसतुंडमंडलशंखावर्त्ताः।तेषामंगुलिमणिबंधगुल्फजानुकूर्परेषु कोराः
संधयः।कक्षावंक्षणदशनेषूदूखलाः।कक्षावंक्षदशनेषु अंसपीठगुदभगनितं
बेषु सामुद्गाः।ग्रीवापृष्ठवंशयोः प्रतराः।शिरःकटिकपालेषु तुन्नसेवनी हन्वो
रुभयतस्तु वायसतुंडाः।प्रायेण व्याख्याताः।भवंति चात्र।अस्थ्नां तु संधयो ह्येते के
वलाः परिकीर्त्तिताः।पेशीस्नायुशिराणां तु संधिसंख्या न विद्यते।नव स्नायु
शतानि तासां शाखासु षट्शतानि।द्वे शते त्रिंशच्च कोष्ठे ग्रीवायां प्रत्यूर्द्धं सप्ततिः

३५

एकैकस्यांतुपादांगुल्यांषट्।निचितास्त्रिंशत्।तावंत्यएवतलकूर्चगुल्फेषु।ता
वंत्यएवजंघायोर्दश।जानुनि।चत्वारिंशदूरौ।द्वावंक्षणे।शतमध्यर्द्धंमेवमे
कस्मिन्सक्थनिभवंति।एतेनेतरसक्थिबाहूचव्याख्यातौ।षष्टिःकट्यां
पृष्ठेशीतिःपार्श्वयोःषष्टिस्तरसित्रिंशत्।षट्त्रिंशद्ग्रीवायामूर्द्धिचतुस्त्रिंशत्।ए
वंनवस्नायुशतानिव्याख्यातानि।महास्नायोयेस्तेकंडरेतिसंज्ञो।भवंतिच।
त्र।स्नायुश्चतुर्विधाविद्यास्तास्तुसर्वानिबोधमे।प्रतानवत्योवृत्ताश्चपृथ्व्यश्च

३५

श्च षिरास्तथा। प्रतानवत्यः शाखासु सर्वसंधिषु चाप्यथ वृत्तास्तु कंडराः सर्वा विज्ञेयाः
कुशलैरिह। आमपक्वाशयांतेषु वस्तौ च सुषिराः खलु॥ पार्श्वोरसि तथा पृष्ठे पृथुलाश्च
शिरस्यथ। नौर्यथा फलकास्तीर्णा बंधनैर्बहुभिर्युता भारक्षमा भवेदप्सु नृयुक्ता सुस
माहिता। एवमेव शरीरेस्मिन्यावंतः संधयः स्मृताः स्नायुभिर्बहुभिर्बद्धास्तेन भारस
हा नराः। नह्यस्थीनि न वा पेश्यो न शिरा न च संधयः। व्यापादितास्तथा हन्युर्यथा स्ना
युः शरीरिणं। यः स्नायूः प्रविजानाति बाह्याश्चाभ्यंतरास्तथा। स गूढं शल्यमाहर्तुं

देहवतांकोस्तिदेहिनां। पंचपेशीशतानिभवंति। तानिचत्वारिशतानिशाखा
सु। कोष्टेषट्षष्टिः ग्रीवांप्रत्यूर्द्धंचतुस्त्रिंशत। एकैकस्यांतुपादांगुल्यांतिस्रस्तिस्रः
पंचदशप्रपदे। पादोपरिकूर्चसंनिविष्टास्तावत्यएव। दशगुल्फतलयो
र्गुल्फजान्वोरंतरेविंशतिः पंचजानुनिविंशतिरूर्वोः। दशवंक्षणे। शतमेव
मेकस्मिन्सक्थ्निभवति। एतेनेतरसक्थिबाहूव्याख्यातौ। तिस्रःपायौएकामे
ढ्रेसेविन्यामपराद्वेवृषणयोःस्फिजोःपंचपंचद्वेवस्तिशिरसिपंचोदरेनाभ्यामे

काष्ठेष्णेदुसंनिविष्टाः पंच पंच दीर्घाः षट् पार्श्वयोः स्फिजोः पंच पंच द्वे वस्तिशि
रसि यं चो द्वे स्तनो) दश वक्षसि हृपक्षाकांसौ प्रतिसमंतात् सप्त द्वे हृदयामाशययोः
षट् यकृत्प्लीहोंडुकेषु ग्रीवायां चतस्रः द्वे ~~नेत्रयोर्द्वे~~ ऽष्टौ हन्वोः एकैका काकलक
गलयोः द्वे तालुन्येका जिह्वायां द्वे ओष्ठयोः द्वे नासायां गंडयोश्चतस्रः द्वे नेत्रयोः
द्वे कर्णयोः चतस्रो ललाटे एका शिरसीति। एवमेतानि पंच पेशीशतानि भवंति
चात्र शिरास्नाय्वस्थिपर्वाणि संधयश्च शरीरिणां पेशीभिः संवृतान्यत्र बलवं

तिभवंत्यतः स्त्रीणां तु विंशतिरधिका दश। तासां स्तनयोरेकैकस्मिन्‌ पंच पंच यौ
वने तासां परिवृद्धिः। अपत्यपथे चतस्रः। तासां प्रसृते ऽभ्यंतरतो द्वे मुखाश्रि
ते बाह्ये च वृत्ते द्वे गर्भच्छिद्रसंश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव पित्त
पक्वाशयमध्ये गर्भशय्या यत्र गर्भस्तिष्ठति। तासां बहुलापेलवः स्थूलाणुपृथुवृ
त्तह्रस्वदीर्घस्थिरमृदुश्लक्ष्णकर्कशभावाः संध्यस्थिशिरास्नायुप्रच्छादका यथा
प्रदेशं स्वभावत एव भवंति। भवति चात्र। पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता वंक्षण

मुष्कवर्जः॥ स्त्रीणामाहत्यातिष्ठंतिफलमंतर्गतंहिताः मर्मसिराधमनीस्रोतसामन्यत्रवि
भागः भवंतिचात्र॥ शंखनाभ्याकृतिर्योनिस्त्र्यावर्तासाचकीर्तिता॥ तस्यास्तृतीये
त्वावर्त्तेगर्भशय्याप्रतिष्ठिता॥ यथारोहितमत्स्यास्यमुखंभवतिरूपतः तत्संस्था
नांतद्रूपांगर्भशय्यांविदुर्बुधाः॥ आभुग्नोभिमुखःशेतेगर्भोगर्भाशयेस्त्रियाः॥ सयोनिं
शिरसायातिस्वभावात्प्रसवंप्रति॥ त्वक्पर्यंतस्यदेहस्यसोयमंगविनिश्चयः॥ शल्य
ज्ञानादृतेनैववर्ण्यतेंगेषुकेषुचित्॥ तस्मान्निःसंशयंज्ञानमिच्छता॥ शल्यज्ञोविना

धारयित्वामृतंसम्यक्कुद्रव्योगेविनिश्चयः।प्रत्यङ्गतोहियद्दुःखंशास्त्रहर्षंचवयद्रवे

३८ त।समासत्तस्तुभयंप्रयोज्ञानविवर्द्धनं।तस्मात्समस्तागात्रस्यविषोपहतमर्द्दे

दीर्घव्याधिपीडितमवर्षशतिकंनिःसृशंत्रपुरीषेपुरुषेमवहंत्यामापगायांनिवे

द्धंयेजरस्थंमुंज्ञसल्कलकुशाशाणादे।नामन्यतमेनावेष्टितांगबस्यंगमप्रकाशे

देनोकोष्ठसेत।समवज्रकुपितंचोद्धृत्यततोदेहंसम्प्रराज्ञादुसीरवासवेणुव ३९

४२ ल्कैःज्वकूर्चीनामन्यतमेनशनैःशनैश्चवछ्यत्वगादीन्सर्वानेववाह्याभ्यंतरा

त्वगंगप्रत्यंगविशेषान्यथोक्तान्तुलक्षयेच्चक्षुषा।श्लोकौचात्रभवतः।नशक्य
चक्षुषाद्रष्टुंदेहेः सूक्ष्मतमोविभुः दृश्यतेज्ञानचक्षुर्भिस्तपश्चक्षुर्भिरेवच
शरीरेचैवशास्त्रेचदृष्टार्थःस्याद्विशारदः।दृष्टश्रुताभ्यांसंदेहमवपोह्याच
रेत्क्रियां॥ ॥इतिशारीरसंख्याव्याकरणंशारीरंनामपंचमंसमाप्तं॥ अथा
तःप्रत्येकंमर्म्मनिर्देशंशारीरंव्याख्यास्यामः।सप्तोत्तरंमर्म्मशतं।तानिम
र्म्माणिपंचात्मकानिभवंति।तद्यथामांसमर्म्माणि।शिरामर्म्माणि।स्नायुम

३ ए

र्म्माणि। अस्थिमर्म्माणि। संधिमर्म्माणि चेति न खलु मांससिरास्नाय्वस्थिसंधिव्य
तिरेकेणान्यानि मर्म्माणि भवंति। यस्मान्नोपलभ्यंते। तत्रैकादश मांसमर्म्माणि
एकचत्वारिंशत् सिरामर्म्माणि। सप्तविंशति स्नायुमर्म्माणि। अष्टावस्थिमर्म्मा
णि विंशतिः संधिमर्म्माणि चेति। तदेतत्सप्तोत्तरं मर्म्मशतं। तेषामेकादशैकस्मि
न्सक्थनि भवन्ति। एतेनेतरसक्थि बाहू व्याख्यातौ। उदरोरसोर्द्वादश। ३ ए
चतुर्दश पृष्ठे। ग्रीवां प्रत्यूर्द्ध्वं सप्तत्रिंशति। तत्र सक्थिमर्म्माणि क्षिप्रतल

४०

त्वारिशृंगाटकान्येकोधिपतिरिति। तत्र तलहृदयेंद्रवस्तिगुदस्तनरोहितानिमां
समर्म्माणि। नीलाधमनीमातृकाशृंगाटकापांगस्थपनीफणास्तनमूलापालापाप
स्तंभहृदयानाभिपार्श्वसंधिबृहतीलोहिताक्ष्योर्व्यःशिरामर्म्माणि। ःआणि विटपकक्षा
धरकूर्चकूर्चशिरोवस्तिक्षिप्रांसविधुरोत्क्षेपाःस्नायुमर्म्माणि। कटीकतरुणनि
तंबांसफलकशंखास्त्वस्थिमर्म्माणि। जानुकूर्प्परसीमताधिपतिगुल्फमणिबं
धककुंदरा[illegible]वर्त्तकृकाटिकाश्चेतिसंधिमर्म्माणि। जा

४०

लहदयकूर्वेकर्खे[illegible]ऊस्मोइं वक्तिज्ञान्वा।पुढ्वीलोहितारवपाणिविटपंचेति।ए
तेनेतरससक्किव्यारव्यातं।उदरेरोरस्सोरस्त्तुद्दवं स्तिनाभिहदयस्तनमूलस्तनरोहि
तान्यपलायन्यपस्तनौ चेति।२१ष्टमम्मोणितुकटीकतरुणकुंदरानितंवयाश्चैसं
धि हृदसंसफलकान्यंसौ चेति।वाडुमम्मोणितुत्रिवतलहदयकूर्वेकखेशिरोम
म्मीणिउज्जुणहुडुंचतस्तोधमिन्याः।ज्ञाणेमादरकाः।हेद्वे रुकाटिकेद्वे विधरेद्वे
फणौ ह्रावपांगौ द्वावावर्त्तौ द्वावुतोत्क्षेप्यो द्वौ शंखौ एकास्थपनीपंचसीमंताश्च

न्येतानि पंचविकल्पानि भवंति। तद्यथा। सद्यःप्राणहराणि कालांतरप्राणह
राणि विशल्यघ्नानि वैकल्यकराणि रुजाकराणीति तत्र सद्यःप्राणहराणि एकोन
विंशतिः कालांतरप्राणहराणि त्रयस्त्रिंशत्। त्रीणि विशल्यघ्नानि चतुश्चत्वारिं
शद्वैकल्यकराणि। अष्टौ रुजाकराणीति। भवंति चात्र। शृंगाटकान्यधिपतिः शं
खौ कंठसिरा गुदं। हृदयं बस्तिनाभी च घ्नंति सद्यो हतान्नृणां॥ वक्षोमर्माणि सीमं
ततलक्षिप्रेंद्रबस्तयः कटीकतरुणे संधिपार्श्वजौ बृहती नितंबावि

ति चैतानि कालांतरहराणि च ॥ उत्क्षेपौ स्थपनी चैव विशल्यघ्नानि निर्दिशेत् ॥ लो
हिताख्याणि जानूर्वीकूर्चौ विटपकूर्पराः ॥ कुकुंदरे कक्षधरे विधुरे सकृका
टिकैः ॥ अंसांसफलकापांगनीलेमन्येफणौ तथा ॥ वैकल्यकराण्यावर्तौ
द्वौ तथैव च ॥ गुल्फौ द्वौ मणिबंधौ द्वौ द्वे द्वे कूर्चशिरांसि च ॥ रुजाकराणि जानी
यादष्टौ वेतानि बुद्धिमान् ॥ क्षिप्राणि विद्धमात्राणि घ्नंति कालांतरेण वा ॥ मर्मा
णि मांसशिरास्नाय्वस्थिसंधिसन्निपातास्तेषु स्वभावत एव विशेषेण प्राणा ॥

स्तिष्ठंति। तस्मात्मर्म्मस्वभिहतास्तांस्तान्भावान्प्रतिपद्यंते। तत्रसद्यःप्राणहरा
ण्याग्नेयान्यग्निगुणेष्वाशुक्षीणेषुक्षपयंति। कालांतरप्राणहराणिसौम्याग्नेयान्यग्निगु
णेष्वाशुक्षीणेषुक्रमेणचसोमगुणेषुकालांतरेणक्षपयंति। विशल्यप्राणहराणिवा
यव्यानिशल्यमुखावरुद्धोयावदंतर्वायुस्तिष्ठतितावज्जीवत्युद्धृतेतुशल्योम्रिय
ते। पाकात्पतितशल्योवाजीवति। वैकल्यकराणिसौम्यानिसोमोहिस्थिरत्वाच्छैत्या
च्चप्राणावलंबनंकरोति। रुजाकराण्यग्निवायुगुणभूयिष्ठानि। विशेषेणतोरुजा

कारो।पांचभौतिकींचरुजामाहुरेके।केचित्वाहुर्म्मांसादीनांपंचानामपिसम
स्तानांसमृद्धानांसमावायात्वधःप्राणहराणि।द्विहीनानांविशल्यप्राणहराणि।त्रिहीनानां
वैकल्यकराणि।एकस्मिन्नेवरुजाकराणीति।यतश्चैवमतोस्थिमर्मस्वभिहतेषुशोणि
तागमनंभवति।भवंतिचात्रश्लोकाः चतुर्विधायास्तुसिराःशरीरप्रायेणतामर्म्मसु
संनिविष्टाःस्नाय्वस्थिमांसानितथैवसंधीन्संतर्प्यदेहंप्रतिपालयंति।ततःक्षतेम
र्म्मणितासांप्रवृद्धःसमंततोवायुरभिस्तृणोति।विवर्धमानस्तुसमातरिश्वारुजस्त

तीव्राःप्रतनोतिकायेरुजामित्रंतंतुततःशरीरंप्रलीयत्तेनउपतिचास्यसेज्ञा।त्र
तोस्यशल्यंविनिहंतुमिछन्ममर्माणियत्नेनऽपरीक्षकेपदे।एतेनद्वोषंव्याख्यातं।त
त्रसद्यःप्राणहरंमर्मतेविद्धंकालांतरेणमारयति।कालांतरप्राणहरमर्मतेविद्धंवैक
ल्यमापादयति।विशल्यप्राणहरंसवैकल्यकरंकालांतरेणक्लेशयतिरुजांच
करोतिरुजाकरमतीव्रवेदनंभवति।तत्रसद्यःप्राणहराणिमसराज्ञाम्यंतरान्मा
रयंति।कालांतरप्राणहराणिपक्षान्मासाद्वातेषपिवुह्विप्राणिकहा।विशल्याश्चमार

यंति।विशल्यघ्नान्याहुराणि वैकल्पकराणि च कदाचिदिति।निमारयंतीति
अत ऊर्द्ध्वं मर्मस्थानानि व्याख्यास्यामः।तत्र पादस्यांगुष्ठांगुल्योर्मध्ये क्षिप्रम्नाम
र्मतत्र विद्धस्याक्षेपकेनमरणं।मध्यमांगुलीमानुपूर्वेणमध्येपादत-स्य
तलहृदयंतत्ररुजाभिर्म्मरणं।क्षिप्रस्योपरिष्टादुभयतः कूर्चस्तत्रपादस्यभ्र
मणवेपनभवतः।गुल्फसंधेरधउभयतः कूर्चशिरस्तत्ररुजाशोफौ।पादजं
घयोः संधानेगुल्फस्तत्ररुजास्तब्धपादखंजता।पार्ष्णिंप्रतिजंघामध्येइंद्रबस्ति

४३

४३

स्तत्रशोणितक्षयेणमरणं।जंघोर्व्वोःसंधानेजानुस्तत्रखंजता।जानुनऊर्द्ध्वमु
भयतस्त्र्यंगुलेआणी।तत्रशोणिथाभिवृद्धिस्तब्धसक्थिताच।ऊरुमध्येऊर्वी
स्तत्रशोणितक्षयात्सक्थिशोषः।ऊर्व्याऊर्द्ध्वमधोवंक्षणसंधेरूरुमूलेलोहि
ताख्यंतत्रलोहितक्षयेणमरणं।पक्षाघातोवासक्थिशोषोवा।वंक्षणवृषणयो
रंतरेविटपंतत्रषाढ्यमल्पशुक्रतावा।एवमेतान्येकादशसक्थिमर्माणिव्या
ख्यातानि।एतेनेतरसक्थिबाहूव्याख्यातौ।विशेषतस्तुयानिसक्थिगुल्फ

जानुविटपानितानिमर्म्माणि।वेधकूर्परकक्षधराणि।यथा वृषणवंक्षणयोरंतरे
विटपेवेवक्षःकक्षयोर्मध्येकक्षधरंतस्मिन्विद्धेतएवोपद्रवाः।विशेषतस्तु
मणिबंधेकुंठता।कूर्पराख्येकुणिःपक्षाघातःकक्षधरे।एतेनेतरबाहुर्व्याख्या
तः।एवमेतानिचतुश्चत्वारिंशत्शाखास्थमर्म्माणिव्याख्यातानि।अतऊर्द्ध्व
मुदरोरसोर्मर्म्माणिव्याख्यास्यामः॥तत्रवातवर्च्चोनिरसनंस्थूलांत्रप्रतिबद्ध
गुदंनाममर्म्मतत्रसद्योमरणं।अल्पमांसशोणितोभ्यंतरतःकट्यांमूत्राशयो

वस्तिस्तत्रापि सद्योमरणमश्मरीव्रणादृते। तत्राप्युभयतो भिन्ने न जीवति। एक
तो भिन्ने मूत्रस्रावी व्रणो भवति। स तु यत्नेनोपक्रान्तो रोहति। पक्वामाशययोर्मध्ये
सिराप्रभवो नाभिः स्तत्रापि सद्योमरणं। स्तनयोर्मध्यमधिष्ठायोरस्यामाशय
द्वारं सत्वरजस्तमसामधिष्ठानं हृदयं। तत्रापि सद्योमरणं। स्तनयोरधस्ताद्द्व्यंगु
लमुभयतः स्तनमूले तत्र कफपूर्णकोष्ठतया म्रियते। स्तनचूचुकयोरूर्द्ध्वं स्तन
रोहितौ तत्र लोहितपूर्णकोष्ठतया कासश्वासाभ्यां च म्रियते। स्तैनं इपंसकूटयो

रधस्तात्पार्श्वोपरिभागयोरपलापौ।तत्र रक्तेन पूयभावं गतेन मरणं।उभयत्रोरसो ना
ड्यौ वातवहे अपस्तंभौ।तत्र वातपूर्णकोष्ठतया कासश्वासाभ्यां मरणं।एवमेतान्यु
दरोरसोर्द्वादशमर्माणि व्याख्यातानि।अत ऊर्द्ध्वं पृष्ठमर्माणि व्याख्यास्यामः।तत्र
पृष्ठवंशमुभयतः प्रतिश्रोणिकांडमस्थिनी कटीकतरुणे नाम मर्मणी।तत्र श्रोणि
तक्षयात्पांडुर्विवर्णो हीनरूपश्च म्रियते।पार्श्वयोर्जघनबहिर्भागे पृष्ठवंशमुभय
तः कुकुंदरे तत्र [illegible] स्पर्शाज्ञानमधःकायचेष्टोपघातश्च।श्रोणिकां

४५ ४५

डुरोऽ पर्य्याशयाछादनौ पार्श्वांतरप्रतिबद्धौ नितंबौ॥ तत्राधःकायशोषाद्दौर्ब्बल्या
च्चमरणं॥ अधःपार्श्वांतरप्रतिबद्धौ जघनपार्श्वमध्ययोस्तिर्य्यगूर्द्ध्वंच जघनात्पार्श्वसंधी। त
त्रलोहितपूर्णकोष्ठतयाम्रियते॥ स्तनमूलादृजूभयतः पृष्ठवंशस्यबृहत्यौ। तत्रशोणि
तातिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते। पृष्ठोपरिपृष्ठवंशमुभयतःस्त्रिकसंनिबद्धेंऽसफ
लके। तत्रबाह्वोःस्वापशोषौ। बाहुमूर्द्धग्रीवामध्येंऽसपीठस्कंधबंधनावंशौना
मतत्रस्तब्धबाहुताः एवमेतानिचतुर्द्दशपृष्ठमर्म्माणिव्याख्यातानि। अतऊर्द्ध्वमूर्द्ध्व

४६

ऊत्रुगतानिव्याख्यास्यामः॥तत्रकंठनाड्यामुभयतश्चतस्रोधमन्योद्वेनीलेद्वेच
मन्येव्यत्यासेन।तत्रमूकतास्वरवैकृत्यमरसग्राहिताच।ग्रीवायामुभयतश्चत
स्रश्चतस्रःसिरामातृकास्तत्रसद्योमरणं।शिरोग्रीवयोःसंधानेकृकाटिकेतत्र
चलमूर्द्धता।कर्णपृष्ठतोधःसंश्रितेविधुरे।तत्रबाधिर्यं।घ्राणमार्गमुभयतःश्रोतो
मार्गप्रतिबद्धेभ्यंतरःफणेनाममर्मणी।तत्रगंधज्ञानवधः।भ्रूपुच्छांतयोरधो
क्ष्णोर्वाह्यतोपांगौतत्रांध्यंदृष्ट्युपघातोवा।भ्रुवोपरिनिम्नावावर्त्तौतत्राप्यांध्यंद

४६

स्युयथान्तोवा।भ्रुवोरंतोपरिकर्णललाटयोर्मध्येशंखौतत्रसद्योमरणं।शंपरव
योरूपरिकेशांतेउत्क्षेपौ।तत्रसशल्योजीवेत्पाकात्पतितशल्योवानोद्धृतशल्यः।भ्रुवो
र्मध्येस्थपनीतत्रोत्क्षेपवत्।।पंचसंधयःशिरसिविभक्ताःसीमंताःतत्रोन्मादभयचि
त्तनाशैर्मरणं।घ्राणश्रोत्राक्षिजिह्वासंतर्पणीनांशिराणांमध्येशिरसःसन्निपातःशृं
गाटकानितानिचत्वारिमर्माणितत्रापिसद्योमरणं।मस्तकाभ्यंतरोपरिष्टाच्छिरासंधि
संनिपातोरोमावर्त्तोधिपतिःतत्रापिसद्यएवमरणं।एवमेतानिसप्तत्रिंशदूर्ध्वजत्रुगता

निमर्म्माणिव्याख्यातानि।भवंतिचात्र।ऊर्व्वःशिराणिविटपेचसकक्षपार्श्वेएकैकां
गुलिमिताःस्तनमूलहृदौविद्यंगुलहृदयमितेमणिवंधगुल्फेत्रीणिपवज्जानुनियंरम
हकूर्परभ्यं'हृद्बस्तिकूर्चगुदनाभवदंतिमूर्ध्निचत्वारिपंचगलेदशयानिचद्वे।
तानिस्वपाणितलकुंचितसंमितानिशेषाण्यवेहियरिविस्तारतोंगुलोर्द्धं।एतस्य
माणमभिवीक्ष्यवदंतितज्ज्ञाःशस्त्रेणकर्म्मकरणंपरिहृत्यकार्यं।पार्श्वाभिघातितम
मपिहिहन्तिहंतिमर्म्मतस्माद्धिमर्म्मसदनंपरिवर्ज्जनीयं।छिन्नेषुपाणिसुचरणेषु

४१

शिरानराणांसंकोचमीयुरसृगल्पमतोनिरेति॥प्राप्यामितंव्यसनमुग्रमतोमनुष्यः
संछिन्नशाखवत्तरुवन्निधनंनयाति॥क्षिप्रेषुतत्रसतलेषुहतेषुरक्तंगच्छत्यतीवपवन
श्चरुजःकरोति।एवंविनाशमुपयांतिहितत्रविद्धाःवृक्षाइवायुधनिपातनिकृत्त
मूलाः॥तस्मात्तयोरभिहतस्यतुपाणिपादं।छेत्तव्यमाशुमणिबंधनगुल्फदेशे॥
मर्म्माणिशल्यविषयार्द्धमुदाहरंति।यस्माच्चमर्म्मसुहतानभवंतिसद्यः॥जीवंति
तत्रयदिवैद्यगुणेनकेचित्प्राप्नुवंति॥विकलत्वमसंशयंहि।संभिन्नजर्ज

शितकोष्ठशिरःकपालाजीवंतिशस्त्रविहतैश्चशरीरदेशैः।छिन्नैश्चसक्थिभुजपा
दकरैरशेषैर्येषांनमर्म्मसुकृताविधाःप्रहाराः।सोममारुततेजांसिरजःसत्व
तमांसिचामर्म्मसुप्रायशःपुंसांभूतात्माचापितिष्टते॥मर्म्मस्वभिहितास्तस्मा
न्नजीवंतिशरीरिणः।इंद्रियार्थेष्वसंप्राप्तिर्मनोबुद्धिविपर्ययः।रुजश्चविविधा
स्तीव्राभवंत्यसुहरेहते।हतेकालांतरघ्नेतुध्रुवोधातुक्षयोमहान्।ततोधातु
क्षयाज्जंतुर्वेदनाभिश्चनश्यति।हतेवैकल्यजननेकेवलंवैद्यनैपुणात्।शरी

४८

४८

शेषं क्रियया मुक्तं विकलीभवत्यामरणात्॥ विकल्पघ्नेतु विज्ञेयं हर्वोक्तं यत्तु कारणं॥
रुजाकराणि मर्माणि हतानि विविधारुजः॥ कुर्वंत्येतानि वैकल्पं कुवैद्यवशगोय
दि॥ छेदभेदाभिघातेभ्यो दाहनाद्दारुणादपि॥ उपघातं विजानीयान्मर्माणां तुल्यल
क्षणं॥ मर्माभिघातस्तु न कश्चिदस्ति योल्पात्ययो वापि निरत्ययो वा प्रायेण मर्म
स्वभिताडितास्तु वैकल्पमिछंत्यथवा म्रियंते॥ मर्मण्यपि क्षिण्णम हि ये विकारा
भवंति काये विविधा नराणां॥ प्रायेण ते कृच्छ्रतमा भवंति नरस्य यत्नैरपि साध्यमानाः॥

४७

इतिमर्म्मनिर्द्देशंशारीरंसमाप्तं॥६॥ ॥अथातःशिरावर्णविभक्तिशारीरंनामाध्या
यंव्याख्यास्यामः॥सप्तशिराशतानिभवंतियाभिरिदंशरीरमाराम इवजलहारिणी
भिःकेदारइवकुल्याभिरुपस्नेह्यते।अनुगृह्यतेच।आकुंचनप्रसारणादिभिर्विशेषै
द्रुमपत्रसेविनीनामिवच।तासांप्रतानाः तासांनाभिर्म्मूलं ततश्चप्रसरंत्यूर्द्धम
धस्तिर्यक्च।भवंतिचात्र।यावंत्यस्तुशिराःकायेसंभवंतिशरीरिणां नाभ्यांसर्वा
निबद्धास्ताःप्रतन्वंतिसमंततः॥नाभिस्थाःप्राणिनांप्राणाःप्राणान्नाभिर्व्यपा

४७

श्रिताः।सिराभिराव्रतानाभिश्चक्रनाभिरिवारकैः।।तासांमूलशिराश्चत्वारिंशत्।
तासांवातवाहिन्योदश।पित्तवाहिन्योदश।श्लेष्मवाहिन्योदश।दशरक्तवाहिन्यः।तासां
तुवातवाहिनीनांवातस्थानगतानांपंचसप्तशतंभवंति।पंचसप्तत्याअधिकपंच
सप्तते।तावंत्यः।कफवाहिन्यश्चकफस्थानेरक्तवाहिन्यश्चयकृत्प्लीह्नोः।एवमेतानि
सप्तशिरा—तानिभवंति।तत्रवातवाहिन्यःशिराएकस्मिंन्सक्थ्निपंचविंशतिः।ए
तेनेतरसक्थिबाहूव्याख्यातौ।विशेषतस्तुकोष्टेचतुस्त्रिंशत्।तासांगुदमेढ्राश्रिताः

श्रोण्यामष्टौ।द्वेद्वेपार्श्वयोःषट्पृष्ठेतावत्यएवचोदरे।दशवक्षसि।एकचत्वारिं
शज्जत्रुणऊर्द्ध्वं।तासांचतुर्दशग्रीवायांकर्णयोश्चतस्रः।नवजिह्वायां।षन्नासिका
यां।अष्टौनेत्रयोः।एवमेतत्पंचसप्ततंशतंवातवहानांशिराणांव्याख्यातंभवति।ए
षएवविभागःशेषाणामपि।विशेषस्तुस्तुपित्तवाहिन्योः।नेत्रयोर्दशकर्णयोर्द्वे
एवंरक्तवहाःकफवहाश्चाषोडशग्रीवायांकर्णयोर्द्वे।एवमेतानिसप्तशिराशता
निसविभागानिव्याख्यातानि।भवंतिचात्रश्लोकाः।क्रियायामप्रतीघातममोहंबु

५०

